# परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतिः

**POLICY ON**
**CONSULTANCIES AND PARTNERSHIPS**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**Central Sanskrit University**

**संसदः अधिनियमेन स्थापितः**

**(Established by an act of Parliament)**

**56-57 सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली-११००५८**

**56-57, Institutional Area, Janakpuri, New Delhi - 110058**

R.K. Barman.
02.11.2022
Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058

## परामर्शप्रक्रियाः सम्भूयकारिताः
## इत्येतासां नीतेः दिशानिर्देशाः

**यतोऽहि** केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः-2020 इत्येषः 2020 तमे संवत्सरे अप्रैल् मासस्य 25 तमे दिनाङ्के क्रियान्वितोऽस्ति,

**यस्माच्च** अधिसूचिते केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमे (25/04/2020) केन्द्रीयसंस्कृतविश्वविद्यालयस्य स्थापनोद्देश्यानि अधोलिखितक्रमेण प्रकटीकृतानि; तस्माच्च तथा -

**"(5.) यथास्मै उचितं भाति तथा संस्कृतभाषायाः तत्सम्बद्धशाखानां संवर्धनार्थं च शैक्षिकशोधविस्तारसौकर्याणि प्रकल्प्य ज्ञानस्य उत्कर्षत्वसम्पादनं विश्वविद्यालयस्य उद्देश्यं सम्भवति।"**

**यतोऽहि** संसदः स एव अधिनियमः केन्द्रीयसंस्कृतविश्वविद्यालयं नियुङ्क्ते यत्सः-

**"(xii) देशस्थेन देशान्तरस्थेन केनचित् विश्वविद्यालयेन अधिकरणेन उच्चशिक्षासंस्थानेन वा यथास्मै उचितं भाति तथा सहयोगसहकारसहसम्बन्धान् संस्थापयति..."**

**"(xv) यथोचितं शोधपरामर्शसेवासौकर्याणि प्रकल्प्य तत्र साफल्यसम्पादनाय विश्वविद्यालयान्तरैः संस्थानान्तरैः सङ्घटनान्तरैः सह सम्भूयकारिताः निश्चिनोति।"**

**यतः** अन्यसंस्थाभिः सङ्घटनैः सह परामर्शप्रक्रियाः सम्भूयकारिताः इत्यनयोः संस्थापननियमस्य विनिश्चयार्थम् एकस्य विधेः क्रियान्वयनम् अत्र सौकर्याय कल्पते।

**यतः ;** अमूदृक्षः विधिः अद्यावधि अस्तित्वे न अस्ति।

**अथातः** अधिनियमेऽस्मिन् प्रदत्ताधिकाराणां बलेन केन्द्रीयसंस्कृतविश्वविद्यालयः अधोलिखितान् दिशानिर्देशान् प्रकटयति -

1. एते दिशानिर्देशाः ' परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतिः ' इति प्रोच्यन्ते।
2. यद्दिने इमे दिशानिर्देशाः व्यवस्थापनपरिषदि पारिताः भवन्ति तद्दिनादेव एते क्रियान्विताः जायन्ते।

**3. परिभाषाः**

क) विश्वविद्यालयः इत्युक्ते - केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली

ख) व्यवस्थापनपरिषत् इत्युक्ते - दिल्लीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयस्य व्यवस्थापनपरिषत्

ग) विद्वत्परिषत् इत्युक्ते - केन्द्रीयसंस्कृतविश्वविद्यालयस्य विद्वत्परिषत्

घ) कुलपतिः इत्युक्ते - दिल्लीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः

ङ ) कुलसचिवः इत्युक्ते - दिल्लीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिवः

R.K. Barman
02.11.2022
Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058

**4. उद्देश्यम्**

परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतिसम्बद्धदिशानिर्देशानां संस्थापनोपद्देश्यमस्ति यत् वर्तमानकाले स्थानीये राष्ट्रीये वैश्विकस्तरे वा उपलभ्यमानानि बौद्धिकभौतिकसंसाधानानि मिथः उपयुज्य पारस्परिकसहयोगेन संस्कृतभाषायाः ज्ञानस्य वा विश्वतोमुखत्वख्यापनाय शैक्षिकनागरिकव्यावसायिकसंस्थाभिः सह परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः औपचारिकरूपेण क्रियान्वयनज्ञानसम्पादनम् । यतोऽहि विश्वमिदं प्राचीनसंस्कृतवाङ्मये सन्निहिताभ्यां ज्ञानविज्ञानाभ्यां लाभान्वितं सत् परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां माध्यमेन सन्ततं अभिवृद्धं भवेत्। ततो प्राप्तज्ञानानुभवविशेषज्ञताः बृहते समाजाय सम्प्रदाय विश्वविद्यालयसमाजयोरुभयोरपि कल्याणं चिन्तयेत् इति ।

**5. अभियानम्/ ध्येयम्**

अभियानस्य तात्पर्यम् अस्ति यत् विश्वविद्यालयाय तथा दिशानिर्देशः कर्तव्यः यथा सः प्राचीनसंस्कृतग्रन्थेषु सन्निहितस्य प्राचीनभारतीयज्ञानस्य (यस्याश्चर्यकरावशेषाः अद्यापि भारतस्य कोणे कोणे विकीर्णाः सन्ति, तस्य) साम्प्रतिकविज्ञानप्रौद्योगिक्योश्च सम्पर्कसेतु: इव कार्यं कर्तुं शक्नुयात्। प्राक्कालिके जगति भारतं ज्ञानविज्ञानप्रौद्योगिक्यादिषु क्षेत्रेषु शीर्षस्थाने तथैव विराजते स्म यथाद्य जगति पाश्चात्यराष्ट्राणि विराजन्ते। विश्वविद्यालयः द्विविधज्ञानाभ्यां साम्प्रतिकाय विश्वाय द्विगुणितं लाभं दापयितुम् इच्छति।

शताब्दतः दास्येन शोषणेन परिपीडितं भूत्वा अद्य पुनः जागरितं भारतं नवोत्साहोन्मेषाभ्यां सह आत्मविश्वासेन अग्रेसरत् अस्ति। सः कालोऽपि समुपस्थितः यस्मिन् भारतं भारतीयं प्रत्येकं पदार्थं च अधिकृत्य सम्पूर्णं विश्वं सोत्साहं पश्यदस्ति। एषः विश्वविद्यालयः भारतीयतासुगन्धवातोपमं तरङ्गम् अधिरुह्य भारतीयज्ञानाधुनिकविज्ञानरूपयोः पक्षयोः बलेन च मानवीयोपलब्धीनाम् उच्चस्तरप्रापणमाध्यमं भूयात् इति ।

**6. दूरदृष्टिः**

ध्येयपथिकेन विश्वविद्यालयेन पूर्वोक्तध्येयानामवाप्तये सम्प्रति मुख्यधारायां वर्तमानैः शैक्षिकशोधसंस्थानान्तरैः सह (यत्र अभियान्त्रिकी ,वैद्यकीयम्, प्रौद्योगिकी इत्याद्याः संस्थाः सम्मिलिताः स्युः) सम्भूयकारिताः विनिश्चित्य प्राचीनभारतीयग्रन्थावगाहानपूर्वकं तत्र विशुद्धं शोधकार्यं च विधाय एकस्य क्रमबद्धस्य ज्ञानभाण्डागारस्य निर्माणं कर्तव्यं ; यस्य च लाभं क्षेत्रविशेषे शोधरताः विना क्लेशं सम्प्राप्य स्वशोधकार्यसम्बद्धावश्यकतानां परिपूर्तये अपेक्षितान् विश्वविद्यालयस्य विषयविशेषज्ञान् पार्थक्येन/व्यक्तिशः/ स्वेच्छामात्रेण सम्पर्कयितुं शक्नुयुः।

R.K. Barman.
02.11.2022

Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058

## परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतिः

नीतेः इदं लेख्यपत्रं केन्द्रीयसंस्कृतविश्वविद्यालयस्य "परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतिः" इति अभिधीयते। समाजस्य उद्यमिनां च हिताय परस्परं लाभादे वातावरणे अस्यै प्रक्रियायै गतिशीलताप्रदानावसरे पुनः इतरैः शैक्षिकप्रौद्योगिकव्यावसायिकसंस्थाभिः सह परामर्शप्रक्रियाः सम्भूयकारिताश्च अभिवर्धनावसरे च नीतिरेषा प्रयुज्यते। नीतिरेषा विश्वविद्यालयस्य विविधविभागेभ्योऽपि परामर्शप्रक्रियाः सम्भूयकारिताश्च विकासयितुं प्रोत्साहयति।

**परिभाषाः**

**1.परामर्शप्रक्रियाः**

परामर्शप्रक्रिया सः महत्वपूर्णः प्रक्रमः यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य विद्वद्भ्यः स्वज्ञानस्य विशेषज्ञतायाश्च सर्वकाराय सार्वजनिकसंस्थाभ्यः स्वायत्तसङ्घटनाभ्यः सामुदायिकसमूहेभ्यश्च प्रदातुं अवसरं ददाति।

परामर्शप्रक्रियायां द्विमुखप्रवेशद्वारवत् अन्तःक्रियाः प्रचलन्ति यत्रैकस्मात् मुखात् विभिन्नघटकसङ्घटनभागविभागादिभिः अङ्गैः सहिताय समाजाय तदीयविभिन्नक्षेत्रस्थैः विशेषज्ञैः विश्वविद्यालयात् प्राप्तानां सर्वोत्तमज्ञानानुभवप्रौद्योगिक्यादीनां ज्ञानं सञ्जायते द्वितीयात् मुखात् अर्थात् परामर्शकरूपेण गत्वा प्रतिनिवृत्तविदुषः ( विश्वविद्यालयप्रतिनिधिभूतस्य) सम्प्राप्तान्तर्दृष्टेः अनुभवस्य सम्पर्कस्य अवलोकनेन तदीयपरवर्तिकालिकाध्ययनानुसन्धानादीनां परीक्षणेन च विश्वविद्यालयोऽपि स्वीयं ज्ञानं विशेषज्ञत्वं च वास्तविकरूपेण सफलं वा विफलं वा इति अभिज्ञातुं प्रभवति । अनेन विश्वविद्यालयस्य विद्वान् अपि आत्मावलोकनं कृत्वा प्राप्तज्ञानं संशोध्य यथा स्वीयं ज्ञानं सामयिकं समाजोपयोगि च स्यात् तथा परिष्कर्तुं शक्नोति।

परामर्शप्रक्रियाभिः परामर्शप्रक्रियायां संलग्नाः विशेषज्ञाः विद्वांसः लाभान्विताः भवन्ति। विश्वविद्यालयस्य राजस्वेऽपि वृद्धिः जायते।

अतः विश्वविद्यालयः परामर्शप्रक्रियायाम् अस्यां यथाशक्ति सानुबन्धोत्तरदायिनो स्वीयान् विदुषः नियोजयितुम् एतद्दिशि तान् अभिप्रेरयितुं च सफलः भवेत्।

R.K. Barman
Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058

**2.सम्भूयकारिता**

सम्भूयकारिता इत्येतस्य पदस्य तात्पर्यं तया प्रक्रियया अस्ति यया विश्वविद्यालयस्य सेवासु वृद्धिं विकासं च सम्पादयितुं शक्यते। एवमेव तदीयाः शिक्षकाः व्यक्तिशः विभागशः अथवा समग्रविश्वविद्यालयपक्षतः सर्वकारेण अन्यशैक्षिकसंस्थाभिः सार्वजनिकक्षेत्रस्थोद्यमैः सर्वकारीयेतरसंस्थाभिः व्यापारपरसङ्घटनैः सामुदायिकसमूहैश्च सह सार्थकमेकं संविञ्ज्ञापकं प्रवर्तयितुं प्रभवन्ति। इयं सम्भूयकारिता नियताधारा विषयाधारा वा भवितुमर्हति। सम्भूयकारिता संस्थास्तरीया क्षेत्रस्तरीया राज्यस्तरीया राष्ट्रस्तरीया अन्ताराष्ट्रियस्तरीया वा भवितुमर्हति। सम्भूयकारिता सधना निर्धना सहदायित्वसंयुक्तापि भवितुमर्हति। सहकारोपेतसम्भूयकारितायां संलग्नाः संस्थाः शिक्षकाणां छात्राणां च विनिमयकार्यक्रमरूपेणापि प्रक्रियामेनां प्रवर्तयितुं प्रभवन्ति।

**परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः दिशानिर्देशाः**

1. विश्वविद्यालयः विभिन्नविभागेषु उपलभ्यमानाः विशिष्टदक्षताः स्वशिक्षकाणां विशेषोपलब्धीः विशिष्टक्षमताश्च आदावेव प्रकटीकरोति; कुतश्चेत् या कापि व्यक्तिः स्वीये सम्बद्धक्षेत्रविशेषे परामर्शप्रक्रियायाः आवश्यकताम् अनुभवति तर्हि सा सर्वादौ अस्माकं सम्पर्कं कुर्यात् इति।
2. प्राचीनभारतीयज्ञानपरम्परायां विशिष्य स्थापत्यकलायां ज्योतिर्विज्ञाने भैषज्ये शल्ये शरीरविज्ञाने अभियान्त्रिक्यां विधिशास्त्रे कृषौ ललितकलासु च अद्यावधि अस्पृष्टाः अनुसन्धेयाश्च ये विषयाः सन्ति तेषु अनुसन्धानकार्यसम्पादनाय विश्वविद्यालयः स्वीयान् विदुषः छात्रान् च अभिप्रेरयेत्। अन्तःशास्त्रीयविषयेषु शोधकार्यसम्पादनाय विद्वांसः प्रेरणीयाः यत्र प्राचीनज्ञानस्य आधुनिकशोधसाधनानां मापदण्डानां माध्यमेन सत्यापनं कर्तुं शक्यते। अनेन प्राचीनज्ञानं वैज्ञानिकक्रमेण सत्यापनक्षमैः सिद्धान्तैः समाधारितमस्तीति आधुनिकविज्ञानिनोऽपि विश्वसितुं शक्नुवन्ति।
3. विश्वविद्यालयः परिसरस्तरे केन्द्रस्तरे च परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः विषये समर्पितचित्तं तादृशम् एकैकम् अधिकारिणं नियोजयेत् यः परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेर्विषये अपेक्षितसूचनाः दातुं समर्थोऽस्ति।
4. परिसरीयः कार्यालयः सूचनाधिकारी च विश्वविद्यालयस्य परामर्शप्रक्रियासम्बद्धविचारवेत्ता सन् तत्सम्बद्धान् सर्वान् अभिलेखान् प्रपत्राणि च स्वकोषे संस्थापयेत्। सः परामर्शकाङ्क्षिभिः क्रियमाणान् प्रश्नान् स्वीकृत्य तेषां समाधानान्वेषणाय मुख्यालयस्य कृते तान् प्रश्नान् अग्रे सारयेत्।

R.K. Barman,

Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058

5. परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेर्विषये पौनःपुन्येन क्रियमाणाः प्रश्नाः तेषां समाधानानि च विश्वविद्यालयस्य जालस्थानेऽपि उपलभ्येरन्।

6. परामर्शप्रक्रियाः सम्भूयकारिताः इत्याभिः सम्बद्धः मुख्यालयस्थः कक्षः परिसरस्तरीयात् कार्यालयात् प्रेषितान् दत्तांशान् स्वीकुर्यात् । विश्वविद्यालयकक्षः स्वयमेव प्रश्नान् स्वीकर्तुमपि शक्नोति।

7. कुलपतेः निर्देशानुसारं परामर्शप्रक्रियाः सम्भूयकारिताः इत्याभिः सम्बद्धः मुख्यालयस्थः कक्षः शैक्षिकसंस्थानैः नागरिकसंस्थाभिः व्यापारसंस्थाभिः सामाजिकगृहैः सह सम्पर्कं विधाय सम्भूयकारितायाः प्रस्तावं कर्तुं शक्नोति।

8. विश्वविद्यालयस्य परामर्शप्रक्रियाः सम्भूयकारिताः इत्याभिः सम्बद्धः मुख्यालयस्थः कक्षः विभिन्नेषु परिसरेषु उपलभ्यमानाः विशेषज्ञताः स्वस्मिन् सदैव संस्थाप्य तदाधारेण परिसरान्तरैः विभागैः विशेषज्ञैः वा क्रियमाणान् सूचनासम्बद्धप्रश्नान् समाधातुं प्रभवेत् ।

9. सम्भूयकारितायाः प्राप्तप्रस्तावं मुख्यालयस्थः कक्षः कुलपतये अग्रे सारयेत्। कुलपतिः अग्रे सारितं प्रस्तावं ससूक्ष्मं परिशील्य सः समीचीनः आहोस्वित् असमीचीनः इति सूचयितुमेकां समितिं रचयितुं शक्नोति। सम्भूयकारितायाः प्रस्तावपरिशीलनप्रसङ्गे समितिः अधोलिखितेषु बिन्दुषु ध्यानं दद्यात्।

क) परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः सम्बद्धैः कार्यक्रमैः विश्वविद्यालयस्य शिक्षकाणां छात्राणां च विशेषज्ञतायाः सदुपयोगः विस्तारश्च भवेत्।

ख) परामर्शप्रक्रियाः सम्भूयकारिताः च विश्वविद्यालयस्य ध्येयविरुद्धाः भावेच्छाविरुद्धाश्च न भवेयुः।

ग) परामर्शप्रक्रियाः सम्भूयकारिताः च विश्वविद्यालयाय आर्थिकभारं विधिसम्बद्धसमस्यां च न जनयेयुः।

घ) परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां विषये पारस्परिकसहयोगार्थं सिद्धाभ्याम् उभाभ्यां पक्षाभ्यां संविज्ज्ञापके हस्ताक्षरकरणात् परमेव निर्णयः जायते। संविज्ज्ञापके परामर्शस्य सीमाः, प्रदेयानि, पारस्परिकोत्तरदायित्वानि, समयसीमाः, आर्थिकानुबन्धाः, संवादाः, विवादोपशमनोपायाः, गोपनीयता इत्येतेषां सुस्पष्टम् उल्लेखः विधेयः।

ङ ) प्रत्येकं परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतिः संविज्ज्ञापकेन सह आर्थिकव्यययोजनया योजनाप्रस्तावेन च संलग्ना भवेत्।

10. सम्भूयकारितायाः एषः प्रस्तावः विश्वविद्यालयस्य उद्देशानां लक्ष्याणां च प्राप्तये पूरकोऽस्तीति यदि कुलपतिः भावयति तर्हि सः समित्याः संसूचनां पारस्परिकसहयोगार्थं सिद्धाभ्याम् उभाभ्यां संस्थाभ्यां हस्ताक्षरितं संविज्ज्ञापकं च परिष्कर्तुं विश्वविद्यालयीयविधिविभागं प्रति सम्प्रेष्य ततो परिष्कृतमेव संविज्ज्ञापकं व्यवस्थापनपरिषदि प्रस्तुतीकुर्यात्।

R. K. Barman

Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058

11. संविञ्ज्ञापकेन सम्बद्धेषु सर्वेषु पत्रेषु विश्वविद्यालयस्य पक्षतः संरक्षकस्थानीयस्य अधिकृताधिकारिणः/ कुलसचिवस्य हस्ताक्षरं भवेदेव।

12. कुलपतिः परामर्शप्रक्रियाः सम्भूयकारिताः इत्येताभिः सम्बद्धानां संविञ्ज्ञापकानां पुनः परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतौ दृष्टिं प्रसारयितुम् एकां समितिं रचयितुं शक्नोति।

13. परामर्शप्रक्रियाः सम्भूयकारिताः इत्येताभिः सम्बद्धानां नीतीनां विषये सम्बद्धैः उत्तरदायिभिः काले काले कृतस्य कार्यस्य पुनरीक्षणं विधाय पुनस्तेषामेव हस्तात् प्रतिवेदनम् अपि स्वीकर्तव्यम्।

14. परामर्शप्रक्रियासु सम्भूयकारितासु च परस्परं विरुद्धानि तथ्यानि वञ्चनानि आरोपाश्च परिदृश्यन्ते चेत्तर्हि विश्वविद्यालयः तत्र परिपृच्छां कर्तुं तत्र संलग्नान् दण्डयितुं च शक्नोति।

15. परामर्शप्रक्रियातः सम्भूयकारितातः प्राप्तव्येषु अर्थेषु विश्वविद्यालयस्यापि आधिपत्यं भवत्येव।

16. परामर्शप्रक्रियायाः सम्भूयकारितायाश्च निर्वहणाय अपेक्षितानां समुचितार्थिकप्रक्रमाणां प्रक्रियाणां च व्यवस्थां विश्वविद्यालयः कुर्यात्।

17. परामर्शप्रक्रियाभिः सम्भूयकारिताभिः च सम्बद्धानां समेषां सङ्ख्यानानां विगणनानि विधाय तदुपयोगिताविषयकप्रमाणपत्राणां लेख्यप्रमाणीकरणं सम्पादनीयम्।

18. परामर्शप्रक्रियायाः सम्भूयकारितायाश्च सम्बद्धसङ्ख्यानानां परिसमाप्तौ (संविञ्ज्ञापकसमाप्तौ) विश्वविद्यालयस्य (आयव्ययमण्डनावधौ) तत्कर्मचारिणां मध्ये राजस्ववितरणम् अधोलिखिततेन तालिकाक्रमेण सम्भवति।

**विश्वविद्यालयसम्बद्धकर्मचारिणां मध्ये राजस्ववितरणम्**

| प्रकारः | विश्वविद्यालयस्य प्रतिशतता | शिक्षकाणां/कर्मचारिणां प्रतिशतता |
|---|---|---|
| व्यक्तिगतपरामर्शः | 20% | 80% |
| परियोजनापरीक्षणम् | 40% | 60% |
| सामाजिकप्रशिक्षणम् | 30% | 70% |

19. परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः सम्बद्धानां सेवानां सुचारुरूपेण सञ्चालनाय यदि बाह्यविशेषज्ञानां मानवीयसंसाधनानां वा आवश्यकता अनुभूयते तर्हि विश्वविद्यालयाधिकृताधिकारिणां पूर्वानुमतिं स्वीकृत्य अपेक्षितव्यवस्थां कर्तुं शक्यते।

20. परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः सम्बद्धासु सेवायोजनासु संलग्नाः विश्वविद्यालयस्य कर्मचारिणः कर्तव्यविरामं स्वीकर्तुं शक्नुवन्ति। परन्तु तेभ्यः प्रदत्तानि

R.K.Barman.
02.11.2022

Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058

विश्वविद्यालयीयकर्तव्योत्तरदायित्वानि अनेन व्याजेन यथा बाधितानि न भवेयुः तथा तैः कार्याणि सम्पादनीयानि।

21. परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः सम्बद्धासु सेवासु संलग्नाः कर्मचारिणः अन्ये च एतत्कार्यकरणावसरे जायमानं गमनागमनव्ययं सत्कारधनराशिं तदितरव्यक्तिगतव्ययं सेवासम्बद्धनिर्दिष्टकोषादेव प्राप्तुं प्रभवन्ति।

R.K. Barman
02.11.2022
Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
56-57, Institutional Area,
Janakpuri, New Delhi - 110058